# संस्कृत वार्ताः

दिनाङ्क :- 09.08.2026 प्रात: - 06:55

## अथवार्ताः

### प्रधानमन्त्री आईं आई टी

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः आईआइटी दिल्ली इति भारतीयप्रौद्योगिकीसंस्थानस्य विद्यार्थिनः समाकारिताः यत् ते स्वनिर्णयेषु राष्ट्रहितं सर्वोपरि स्थापयन्तु। आईआइटी दिल्ली इत्यस्य सप्तपञ्चाशततमं दीक्षान्तसमारोहं सम्बोधयन् श्रीमोदी अवदत् यत् प्रत्येकं सन्ततिः तात्कालिकं विशिष्टं समाह्वानं सम्मुखी-करोति, स्वस्य राष्ट्रियदायित्वं च निर्वहति। प्रधानमन्त्रिणा उक्तं यत् देशे नूतनानां क्षेत्राणां विकासेन युवभ्यः नूतनाः अवसराः सृज्यन्ते। सेमीकंडक्टर, अंतरिक्ष ड्रोन इत्यादीनां क्षेत्राणां उदाहरणानि उद्धृत्य सः अवदत् यत् भारतं सर्वेषु क्षेत्रेषु आत्मनिर्भरता-प्राप्तये कार्यं कुर्वन् अस्ति। श्रीमोदी अवदत् यत् आत्मनिर्भरतायाः अयम् उपक्रमः विकसितभारतस्य निर्माणार्थं दृढाधारस्य कार्यं करिष्यति।

अर्धचालकक्षेत्रम् अपि उदाहरणम् अस्ति । अत्रावसरे प्रधानमन्त्रिणा IIT Delhi इत्यत्र "परम प्रज्ञा" इति उच्चदक्षतायुक्तस्य सङ्गणकसौविध्यस्य उद्घाटनमपि कृतम् ।

### प्रधानमंत्री-अमेरिकाउपराष्ट्रपतिः

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः अमेरिका-देशस्य उपराष्ट्रपतिना जे. डी. वेन्स् इत्यनेन सह दूरभाषमाध्यमेन वार्ता कृता। एकस्मिन् सामाजिकान्तर्जालीये-लेखे श्रीमोदी अवदत् यत्, तौ प्रमुखेषु क्षेत्रेषु भारत-अमेरिका-समग्र-वैश्विक-सामरिक-सहभागितां इतोऽपि सुदृढं कर्तुं उपायेषु चर्चितवन्तौ। उभौ उच्च-स्तरीय-कार्येषु निरन्तर-गतिं दृष्टवन्तौ अपि च व्यापारस्य, रक्षायाः, महत्त्वपूर्ण-उदयोन्मुख-प्रौद्योगिकीनां, ऊर्जा-सुरक्षायाः, महत्त्वपूर्ण-खनिजानां च क्षेत्रेषु सहकारं इतोऽपि सुदृढं कर्तुं प्रतिबद्धतां पुनरुद्घाटितवन्तौ। उभौ नेतारौ परस्परहितस्य क्षेत्रीयस्य वैश्विकस्य च विकासविषये अपि विचारानां आदानप्रदानं कृतवन्तौ।

### हर-घर-तिरंगाभियानम्

हर्-घर्-तिरङ्गा-इत्यभियानम् अद्य आरभ्य, अस्मिन् मासे सप्तदश दिनाङ्कपर्यन्तं च प्रचलिष्यति। राष्ट्रध्वजारोहणार्थं नागरिकान् प्रोत्साहयितुं, देशभक्तिं, राष्ट्रिय-ऐक्यं, भारतस्य सांस्कृतिकपरम्परां च

आचरतेषु कार्यक्रमेषु भागं ग्रहीतुं च अस्य उपक्रमस्य उद्देशः अस्ति। द्वाविंशत्यधिक द्विसहस्रतमे वर्षे आजादी का अमृतमहोत्सवस्य भागरूपेण आरब्धम् एतत् अभियानम्, ततः परं देशस्य बृहत्तमेषु जनसहभागित्व-आन्दोलनेषु अन्यतमम् अभवत्। वर्षानुवर्षेषु, एतत् यथार्थजनान्दोलनत्वेन परिवर्तितम् यत् भारतस्य एकतायाः, सम्मानस्य, सामूहिक-राष्ट्रिय-अस्मितायाः च प्रतीकरूपेण त्रिवर्ण-ध्वजं आचरितुम् प्रदेशेषु समुदायेषु च नागरिकान् प्रेरयति। अस्य वर्षस्य अभियानस्य विशिष्टं महत्त्वं वर्तते यत् एतत् भारतस्य राष्ट्रगीतस्य "वंदे मातरम्" इत्यस्य सार्धैकशततमस्य वार्षिकोत्सवस्य संयोगेन भवति, यत् राष्ट्रध्वजं राष्ट्रगीतं च देशभक्तिविशेषस्य उत्सवे सङ्गृहयति। उत्सवस्यांशरूपेण, सम्पूर्णे देशे वंदे मातरम् इत्यस्य सामूहिक-गायनस्य आयोजनं भविष्यति।

## उपराष्ट्रपति विजयपुरम

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य श्रीविजयपुरं-नगरस्य फ्लैग्-प्वाइंट इत्यत्र हर घर-तिरङ्गा-अभियाने भागं स्वीकृत्य राष्ट्रध्वजं उत्तोलयिष्यति। उपराष्ट्रपतिः ह्यः अण्डमान्-निकोबार्-द्वीपानां द्विदिवसीययात्रायै श्रीविजयपुरम्-नगरे आगतः। आई. एन्. एस्. उत्क्रोशे आगमनसमये उपराष्ट्रपतेः औपचारिकं स्वागतम्, गौरव-रक्षाप्रदानं च जातम्।

## अमितशाहः पुदुचेरी

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य प्रेसिडेंटस् पुलिस कलर इति राष्ट्रपति-आरक्षक-वर्ण-प्रदान-समारोहे भागं ग्रहीष्यति। पुदुच्चेरी-आरक्षकैः आयोजिते समारोहे, गृहमन्त्री सैन्यबलाय औपचारिकं ध्वजं समर्पयिष्यति, येन प्रतिष्ठितः पुरस्कारः प्रदीयते। अपराह्णे केन्द्रीय-गृह-मन्त्री पुदुचेरी-नगरस्य मुरुगा-थियेटर-सिगनल् इत्यत्र हर-घर-तिरङ्गा-अभियानाय हरितध्वजं प्रदर्शयिष्यति। श्रीशाहः ह्यः द्विदिवसीयाधिकारिकयात्रायां पुदुच्चेरी-नगरं सम्प्राप्तवान्।

।। इति वार्ता:।।